शास्त्री – II खण्ड साहित्य
रत्नावली

CLASSMATE
Date
Page

प्र०(1)– संतापो हृदय स्मरानलकृतः संप्रत्ययं सह्यतां
नास्त्येवोपशमोऽस्य तां प्रति पुनः किं त्वं मुधा ताम्यसि ।
यन्मूढेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरं
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः ॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षवर्धनदेवप्रणीतस्य रत्नावली नाटिकायाः तृतीयोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्याः – हृदय = रे चेतः । यत् = यतः । मूढेन = मूर्खेण । मया = उदयनेन । तदा = तदानीम् । कथम् अपि = कथञ्चित् । प्राप्तः = लब्धः । सान्द्रचन्दनरसस्पर्शः = सान्द्रस्य = घनस्य, चन्दनरसस्य = मलयजद्रवस्य स्पर्शः = सम्पर्कः इव स्पर्शो यस्य सः । तस्याः = सागरिकायाः । करः = बाहुः । गृहीत्वा = आदाय । त्वयि = कामसन्तप्तहृदये । चिरम् = बहुकालम् । न विन्यस्तः = न स्थापितः एसन् । सम्प्रति = साम्प्रतम् । स्मरानलकृतः = कामाग्निकृतः । अयम् = एषः । सन्तापः = दाहः । सह्यताम् = अनुभूयताम् । अस्य = कामसन्तापस्यैतस्य । उपशमः = शमनम् । नास्ति = न विद्यते एवम् । ताम् प्रति = सागरिकां प्रति । त्वम् = मम हृदयम् । मुधा = वृथा । किम् = कस्मात् । ताम्यसि = ग्लायसि ।

शार्दूलविक्रीडितं वृत्तम् ।

Renu Devi
31/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री-II खण्ड साहित्य तृतीय-पत्रम्
किरातार्जुनीयम् प्रथमः सर्गः

प्र०(1)- किरातार्जुनीय-शब्दस्य व्युत्पत्तिं प्रदर्श्य 'किरात' शब्दोपादाने का युक्तिरिति विलिखतु? अथवा
'किरातार्जुनीयम्' काव्यस्य नामकरणस्य सार्थकतां सोद्देश्यतां विलिखतु?

उत्तरम् :- किरातश्चासौ अर्जुनश्चेति किरातार्जुनौ तदधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम्। श्री शिवः किरातस्य वेषं धारयित्वा अर्जुनेन सह युद्धम् अकरोत। इयम् कथा महाभारते शिव-पुराणे च उपलब्धा अस्ति। अस्य महाकाव्यस्य प्रारम्भे एवं युधिष्ठिरेण प्रेषितः वर्णीलिंगः किरातः दुर्योधनस्य राज्यशासनप्रणालीं ज्ञात्वा युधिष्ठिरं प्रति समागच्छति किरातोक्ति पुरस्कृत्य प्रथमं किरातशब्दोपादानम् कृतास्ति कविना। ब्रह्मचारिणः सर्वत्र अविरोधप्रवेशमेव किरातस्य ब्रह्मचारिरूपम् युक्तम्। जनमधिवसतां पाण्डवानां दुःखे तद्राज्यप्राप्तौ च किरातस्य सहयोगः परिलक्ष्यते। अस्मिन् काव्ये देवसेनाध्यक्ष रक्षितेन शिवसैनिकेन सह अन्ते च किरातरूपधारिणा स्वयं शंकरेण साकं अर्जुन-युद्धस्य नायकः नारायणांशजः अर्जुनः एवास्ति। तस्यात्युत्कर्षो धायकः अनुवर्ण्य चरितः किरात एवास्ति तन्नामकरणे प्रथम किरात शब्दोपादानां च युक्तिः संगता भवति।

कवि महाभारतस्य वनपर्वनः एकम् प्रसंगम् नीत्वा अष्टादश सर्गौ अस्य काव्यस्य रचनामकरोत्। अस्य काव्यस्य मुख्य नायकः अर्जुनः धीरोदात्तनायकः अस्ति। अद्यपि किरातार्जुनीयम् काव्यम् वीररसप्रधानं काव्यम् अस्ति, परं च शृंगार-करुणादिरसाः अंगीभूता सन्ति। शरदऋतु हिमालय-संध्या-चन्द्रोदयादेः वर्णनं अनुभवरूपे अभवत् तथा च दिव्य पाशुपतास्त्रलाभः अस्य परिणामः।

राधा रमाकान्त सं० महावि०, सुरख सेना, पूर्णिया
Renu Devi
31/10/20

शास्त्री - I खण्ड साहित्य

अभिज्ञान शाकुन्तलम्

सप्तमोऽङ्कः

प्र०(1) - प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिःकरः। अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपंकजम्॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य शास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दुष्यन्तः क्रीडनकयाचनाय तपस्विन्याः समक्षे पाणि प्रसारयतो बालकस्य हस्ते लौहित्याति शयं विलोक्य चक्रवर्ति लक्षणं निर्धारयन् राजा वदति -

व्याख्या: - वस्तुतः प्रणयेन = अभिलाषेण प्रकर्षेण लोभ्यं प्रलोभ्यं च तद्वस्तु प्रलोभ्यवस्तु तस्मिन् प्रणयेन प्रसारितः प्रलोभ्य वस्तुप्रणयप्रसारितः = लोभनीयं क्रीडनकयाच्ञाप्रसारित जलवद् ग्रथिता अङ्गुलयो यस्यासौ जालग्रथिताङ्गुलिः जालवत्संश्लिष्टाङ्गुलिः जालेषु = छिद्रेषु ग्रथिता अंगुलयो यस्येति विग्रहे अन्तरालसंश्लिष्टांगुलिः उक्तं च सामुद्रिके अतिरिक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः।

चापाङ्कुशाङ्कितः सोऽपि चक्रवर्ती भवेद् ध्रुवम्॥

अस्य बालकस्य करः = हस्तः, पाणिः इद्धरागया इद्धः समृद्धः रागः = लौहित्यं यस्या सा तया इद्धरागया, समृद्ध लौहित्यया नवोषसा नवया = अचिरप्रवृत्तया उषसा = प्रभातेन, भिन्नं = स्फुटितं, अलक्ष्यपत्रान्तरं = अलक्ष्याणि पत्राणामन्तराणि अस्य स अलक्ष्यपत्रान्तरम् = अप्रकटितपत्रसन्धिः, एकपङ्कजम् एकं च तत् पङ्कजमित्येक पंकजं = श्रेष्ठ कमलम्, विभाति = शोभते, रक्तलोऽस्य बालकस्येत्यर्थः। मिलितांगुलिः पाणिः मृदुलतर कमलमिव भासते।

राधा उमाकांत सं० महावि० Renu Devi
सुरवसेना, पूर्णिया। 31/10/20

उपशास्त्री - I खण्ड साहित्य - तृतीय पत्रम्

रघुवंश महाकाव्यम् -

द्वितीयः सर्गः

प्र० (1) - स पाटलायां गवि तस्थिवांसं धनुर्धरः केशरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम्

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास निर्मित रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके गवि स्थितस्य सिंहस्य राज्ञः दिलीपस्य दर्शनस्य वर्णनमस्ति ।

व्याख्या:- धनुर्धरः = चापधरः, सः = नृपः, पाटलायां = श्वेतरक्तवर्णायाम्, गवि = धेनौ, तस्थिवांसं = स्थितम् = केशरिणं = सिंहम्, सानुमतः = पर्वतस्य, धातुमय्यां = गैरिकवत्याम्, अधित्यकायां = ऊर्ध्वभूमौ, प्रफुल्लं = विकासितम्, लोध्रद्रुमं = लोध्राख्य वृक्षम्, इव = यथा, ददर्श = दृष्टवान् ।

Renu Devi
31/10/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।